

# वैभवप्रदाताश्रीसूक्त

हरिः ॐ हिरण्यवर्णांहरिणींसुवर्णरजतस्त्रजाम्।
चन्द्रांहिरण्मयींलक्ष्मींजातवेदो म आवह॥१॥

तां म आवहजातवेदोलक्ष्मीमनपगामिनीम्।
यस्यांहिरण्यंविन्देयंगामश्वं पुरुषानहम्॥२॥

अश्वपूर्वांरथमध्यांहस्तिनादप्रबोधिनीम्।
श्रियंदेवीमुपह्वयेश्रीर्मादेवी जुषताम्॥३॥

कांसोस्मितांहिरण्यप्राकारामार्द्रांज्वलन्तींतृप्तांतर्पयन्तीम्।
पद्मेस्थितांपद्मवर्णांतामिहोपह्वये श्रियम्॥४॥

चन्द्रां प्रभासां यशसा ज्वलन्तीं श्रियं लोके देवजुष्टामुदाराम्।
तां पद्मिनीं शरणमहं प्र पद्ये अलक्ष्मीर्मेनश्यतां त्वां वृणे ॥५॥

आदित्यवर्णेतपसोऽधिजातोवनस्पतिस्तववृक्षोऽथबिल्वः।
तस्यफलानितपसानुदन्तुमायान्तरायाश्चबाह्या अलक्ष्मीः॥६॥

उपैतुमांदेवसखः कीर्तिश्चमणिनासह।
प्रादुर्भूतोऽसुराष्ट्रेऽस्मिन्कीर्तिमृद्धिंददातु मे॥७॥

क्षुत्पिपासामलांज्येष्ठामलक्ष्मींनाशयाम्यहम्।
अभूतिमसमृद्धिंचसर्वांनिर्णुद गृहात्॥८॥

गन्धद्वारांदुराधर्षांनित्यपुष्टांकरीषिणीम्।
ईश्वरींसर्वभूतानांतामिहोपह्वये श्रियम्॥९॥

मनसःकाममाकूतिंवाचःसत्यमशीमहि।
पशूनांरूपमन्नस्यमयिश्रीःश्रयतांयशः॥१०॥

कर्दमेनप्रजाभूतामयिसम्भवकर्दम।
श्रियंवासयमेकुलेमातरंपद्ममालिनीम् ॥११॥

आपःसृजन्तुस्निग्धानिचिक्लीतवसमेगृहे ।
नि च देवींमातरंश्रियंवासयमे कुले॥१२॥

आर्द्रांपुष्करिणींपुष्टिंपिङ्गलांपद्ममालिनीम्।
चन्द्रांहिरण्मयींलक्ष्मींजातवेदो म आवह॥१३॥

आर्द्रांयःकरिणींयष्टिंसुवर्णांहेममालिनीम्।
सूर्यांहिरण्मयींलक्ष्मींजातवेदो म आवह ॥१४॥

तां म आवहजातवेदोलक्ष्मीमनपगामिनीम्।
यस्यांहिरण्यंप्रभूतंगावोदास्योऽश्वान्विन्देयं पूरुषानहम्॥१५॥

यःशुचिःप्रयतोभूत्वाजुहुयादाज्यमन्वहम्।
सूक्तंपञ्चदशर्चंचश्रीकामःसततं जपेत्॥१६॥

पद्मप्रिये पद्म विपद्मपत्रे  पद्मालये पद्मदलायताक्षि ।
विश्वप्रिये विष्णु मनोऽनुकूलेत्वत्पादपद्मं मयि सन्निधत्स्व ॥१७॥

पद्मानने पद्मऊरु पद्माक्षी पद्मसम्भवे ।
त्वं मां भजस्व पद्माक्षी येन सौख्यं लभाम्यहम्॥१८॥

अश्वदायिगोदायिधनदायिमहाधने।
धनंमेजुषताम्देवीसर्वकामांश्चदेहि मे॥१९॥

पुत्रपौत्रधनंधान्यंहस्त्यश्वादिगवेरथम् ।
प्रजानांभवसिमाताआयुष्मन्तंकरोतु माम्॥२०॥

धनमग्निर्धनंवायुर्धनंसूर्योधनंवसुः।
धनमिन्द्रोबृहस्पतिर्वरुणं धनमश्नुते॥२१॥

वैनतेयसोमंपिबसोमंपिबतुवृत्रहा।
सोमंधनस्यसोमिनोमह्यं ददातुसोमिनः॥२२॥

न क्रोधो न च मात्सर्यनलोभोनाशुभामतिः।
भवन्तिकृतपुण्यानांभक्तानांश्रीसूक्तं जपेत्॥२३॥

सरसिजनिलयेसरोजहस्तेधवलतरांशुकगन्धमाल्यशोभे।
भगवतिहरिवल्लभेमनोज्ञेत्रिभुवनभूतिकरिप्रसीदमह्याम् ॥२४॥

विष्णुपत्नींक्षमांदेवींमाधवींमाधवप्रियाम्।
विष्णोःप्रियसखीं देवींनमाम्यच्युतवल्लभाम्॥२५॥

महालक्ष्मी च विद्महेविष्णुपत्नीं च धीमहि।
तन्नोलक्ष्मीः प्रचोदयात्॥२६॥

आनंदः कर्दमः श्रीदश्चिक्लीत इति विश्रुताः।
ऋषयः श्रियः पुत्राश्च मयि श्रीर्देवी देवतामताः॥२७॥

ऋणरोगादिदारिद्र्यपापक्षुदपमृत्यवः।
भयशोकमनस्तापानश्यन्तु मम सर्वदा॥२८॥

श्रीवर्चस्यमायुष्यमारोग्यमाविधात्शोभमानंमहियते।
धनंधान्यंपशुंबहुपुत्रलाभंशतसंवत्सरं दीर्घमायुः॥२९॥

ॐ शान्तिः शान्तिः शान्तिः॥

॥ ॐ ॥